## उपसर्गात् स्वाङ्गं ध्रुवमपर्शु । (१७७/३९११)

उपसर्गात् स्वाङ्गं ध्रुवं पर्शुवर्जितमन्तोदात्तं भवति बहुव्रीहौ समासे । प्रपृष्ठः । प्रोदरः । प्रललाटः । ध्रुवम् इत्येकरूपमुच्यते, ध्रुवमस्य शीतम् इति यथा । सततं यस्य प्रगतं पृष्ठं भवति स प्रपृष्ठः । उपसर्गात् इति किम् ? दर्शनीयललाटः । स्वाङ्गम् इति किम् ? प्रशाखो वृक्षः । ध्रुवम् इति किम् ? उद्बाहुः क्रोशति । अपर्शु इति किम् ? उत्पर्शुः । विपर्शुः ॥

## वनं समासे । (१७८/३९१२)

समासमात्रे वनम् इत्येतदुत्तरपदमुपसर्गात् परमन्तोदात्तं भवति । प्रवणे यष्टव्यम् । निर्वणे प्रणिधीयते । प्रनिरन्तः (८.४.५/१०५०) इति णत्वम् । समासग्रहणं समासमात्रपरिग्रहार्थम्, बहुव्रीहावेव [1]हि स्यात् ॥

## अन्तः । (१७९/३९१३)

अन्तःशब्दादुत्तरं वनमन्तोदात्तं भवति । अन्तर्वणो देशः । अनुपसर्गार्थ आरम्भः ॥

## अन्तश्च । (१८०/३९१४)

अन्तःशब्दश्च उत्तरपदमुपसर्गादन्तोदात्तं भवति । प्रान्तः । पर्यन्तः[2] । बहुव्रीहिरयम् प्रादिसमासो वा ॥

## न निविभ्याम् । (१८१/३९१५)

नि वि इत्येताभ्यामुत्तरोऽन्तःशब्दो नान्तोदात्तो भवति । [3]न्यन्तः । व्यन्तः (तै. ब्रा. २. १. ३. १) । पूर्वपदप्रकृतिस्वरत्वे कृते यणादेशः । तत्र 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (८.२.४/३७५७) इति स्वरितो भवति ॥

## परेरभितोभावि मण्डलम् । (१८२/३९१६)

परेरुत्तरमभितोभाविवचनं [4]मण्डलं चान्तोदात्तं भवति । परिकूलम् । परितीरम् । परिमण्डलम् । बहुव्रीहिरयं प्रादिसमासोऽव्ययीभावो वा । अव्ययीभावपक्षेऽपि हि 'परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु' (६. २. ३३/३७६७) इति पूर्वपदप्रकृतिस्वरत्वं प्राप्तमनेन बाध्यते । अभितः इत्युभयतः । अभितो भावोऽस्यास्ति इति तदभितोभावि । यच्चैवंस्वभावं कूलादि तदभितोभाविग्रहणेन गृह्यते ॥

---

1. हि नास्ति क. फ. ड. 2. समन्तः इत्यधिकम् ब. 3. उदाहरणमिदं नास्ति फ. ह. 4. मण्डलवचनं फ.